# Naradaya Sanatakumaraproktam Savitripanjara Stotram 2

# નારદાય સનતકુમારપ્રોક્તં સાવિત્રીપઞ્જરસ્તોત્રમ્ ૨

## Document Information

Text title : Naradaya Sanatakumaraproktam Savitripanjara Stotram 2

File name : nAradAyasanatakumAraproktaMsAvitrIpanjarastotram.itx

Category : devii, devI, bRRihannAradIyapurANa, panjara, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : bRRihannAradIyapurANa | pUrvabhAga | adhyAya 83/128-154||

Latest update : November 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 16, 2024

*sanskritdocuments.org*

# નારદાય સનતકુમારપ્રોક્તં સાવિત્રીપઞ્જરસ્તોત્રમ્ ૨

સનત્કુમાર ઉવાચ ।
સાધકાનામિયં વિદ્યા ભવેત્કામદુઘા મુને ।
અથ તે સમ્પ્રવક્ષ્યામિ રહસ્યં પરમાદ્ભુતમ્ ॥ ૮૩-૧૨૭॥

સાવિત્રીપઞ્જરં નામ સર્વરક્ષાકરં નૃણામ્ ।
વ્યોમકેશાલકાસક્તાં સુકિરીટવિરાજિતામ્ ॥ ૮૩-૧૨૮॥

મેઘભ્રુકુટિલાક્રાન્તાં વિધિવિષ્ણુશિવાનનામ્ ।
ગુરુભાર્ગવકર્ણાન્તાં સોમસૂર્યાગ્નિલોચનામ્ ॥ ૮૩-૧૨૯॥

ઇડાપિઙ્ગલિકાસૂક્ષ્માવાયુનાસાપુટાન્વિતામ્ ।
સન્ધ્યાદ્વિજોષ્ઠપુટિતાં લસદ્વાગુપજિહ્વિકામ્ ॥ ૮૩-૧૩૦॥

સન્ધ્યાસૂર્યમણિગ્રીવાં મરુદ્બાહુસમન્વિતાન્ ।
પર્જન્યદહૃદયાસક્તાં વસ્વાખ્યપ્રતિમણ્ડલામ્ ॥ ૮૩-૧૩૧॥

આકાશોદરવિભ્રાન્તાં નાભ્યવાન્તરવીથિકામ્ ।
પ્રજાપત્યાખ્યજઘનાં કટીન્દ્રાણીસમાશ્રિતામ્ ॥ ૮૩-૧૩૨॥

ઊર્વોર્મલયમેરુભ્યાં શોભમાનાં સરિદ્વરામ્ ।
સુજાનુજહ્નુકુશિકાં વૈશ્વદેવાખ્યસંજ્ઞિકામ્ ॥ ૮૩-૧૩૩॥

પાદાઙ્ઘ્રિનખલોમાખ્યભૂનાગદ્રુમલક્ષિતામ્ ।
ગ્રહરાશ્યર્ક્ષયોગાદિમૂર્તાવયવસંજ્ઞિકામ્ ॥ ૮૩-૧૩૪॥

તિથિમાસર્તુપક્ષાખ્યૈઃ સઙ્કેતનિમિષાત્મિકામ્ ।
માયાકલ્પિતવૈચિત્ર્યસન્ધ્યાખ્યચ્છદનાવૃતામ્ ॥ ૮૩-૧૩૫॥

જ્વલત્કાલાનલપ્રખ્યાં તડિત્કોટિસમપ્રભામ્ ।
કોટિસૂર્યપ્રતીકાશાં શશિકોટિસુશીતલામ્ ॥ ૮૩-૧૩૬॥

સુધામણ્ડલમધ્યસ્થાં સાન્દ્રાનન્દામૃતાત્મિકામ્ ।

વાગતીતાં મનોઽગમ્યાં વરદાં વેદમાતરમ્ ॥ ૮૩-૧૩૭॥

ચરાચરમયીં નિત્યાં બ્રહ્માક્ષરસમન્વિતામ્ ।
ધ્યાત્વા સ્વાત્માવિભેદેન સાવિત્રીપઞ્જરં ન્યસેત્ ॥ ૮૩-૧૩૮॥

પઞ્ચરસ્ય ઋષિઃ સોઽહં છન્દો વિકૃતિરુચ્યતે ।
દેવતા ચ પરો હંસઃ પરબ્રહ્માદિદેવતા ॥ ૮૩-૧૩૯॥

ધર્માર્થકામમોક્ષાપ્ત્યૈ વિનિયોગ ઉદાહૃતઃ ।
ષડઙ્ગદેવતામન્ત્રૈરઙ્ગન્યાસં સમાચરેત્ ॥ ૮૩-૧૪૦॥

ત્રિધામૂલેન મેધાવી વ્યાપકં હિ સમાચરેત્ ।
પૂર્વોક્તાં દેવાતાં ધ્યાયેત્સાકારાં ગુણસંયુતામ્ ॥ ૮૩-૧૪૧॥

ત્રિપદા હરિજા પૂર્વમુખી બ્રહ્માસ્ત્રસંજ્ઞિકા ।
ચતુર્વિંશતિતત્ત્વાઢ્યા પાતુ પ્રાચીં દિશં મમ ॥ ૮૩-૧૪૨॥

ચતુષ્પદા બ્રહ્મદણ્ડા બ્રહ્માણી દક્ષિણાનના ।
ષટ્ત્રિંશતત્ત્વસંયુક્તા પાતુ મે દક્ષિણાં દિશમ્ ॥ ૮૩-૧૪૩॥

પ્રત્યઙ્મુખી પઞ્ચપદી પઞ્ચાશત્તત્ત્વરૂપિણી ।
પાતુ પ્રતીચીમનિશં મમ બ્રહ્મશિરોઽઙ્કિતા ॥ ૮૩-૧૪૪॥

સૌમ્યાસ્યા બ્રહ્મતુર્યાઢ્યા સાથર્વાઙ્ગિરસાત્મિકા ।
ઉદીચીં ષટ્પદા પાતુ ષષ્ટિતત્ત્વકલાત્મિકા ॥ ૮૩-૧૪૫॥

પઞ્ચાશદ્વર્ણરચિતા નવપાદા શતાક્ષરી ।
વ્યોમા સમ્પાતુ મે વોર્દ્ધ્વશિરો વેદાન્તસંસ્થિતા ॥ ૮૩-૧૪૬॥

વિદ્યુન્નિભા બ્રહ્મસન્ધ્યા મૃગારૂઢા ચતુર્ભુજા ।
ચાપેષુચર્માસિધરા પાતુ મે પાવકીં દિશમ્ ॥ ૮૩-૧૪૭॥

બ્રહ્મી કુમારી ગાયત્રી રક્તાઙ્ગી હંસવાહિની ।
બિભ્રત્કમણ્ડલું ચાક્ષં સ્રુક્સ્રુવૌ પાતુ નૈરૃતિમ્ ॥ ૮૩-૧૪૮॥

શુક્લવર્ણા ચ સાવિત્રી યુવતી વૃષવાહના ।
કપાલશૂલકાક્ષસ્રગ્ધારિણી પાતુ વાયવીમ્ ॥ ૮૩-૧૪૯॥

શ્યામા સરસ્વતી વૃદ્ધા વૈષ્ણવી ગરુડાસના ।
શઙ્ખચક્રાભયકરા પાતુ શૈવીં દિશં મમ ॥ ૮૩-૧૫૦॥

ચતુર્ભુજા દેવમાતા ગૌરાઙ્ગી સિંહવાહના ।
વરાભયખડ્ગચર્મભુજા પાત્વધરાં દિશમ્ ॥ ૮૩-૧૫૧॥

તત્તત્પાર્શ્વે સ્થિતાઃ સ્વસ્વવાહનાયુધભૂષણાઃ ।
સ્વસ્વદિક્ષુસ્થિતાઃ પાન્તુ ગ્રહશક્ત્યઙ્ગસંયુતાઃ ॥ ૮૩-૧૫૨॥

મન્ત્રાધિદેવતારૂપા મુદ્રાધિષ્ઠાતૃદેવતાઃ ।
વ્યાપકત્વેન પાન્ત્વસ્માનાપાદતલમસ્તકમ્ ॥ ૮૩-૧૫૩॥

ઇદં તે કથિતં સત્યં સાવિત્રીપઞ્જરં મયા ।
સન્ધ્યયોઃ પ્રત્યહં ભક્ત્યા જપકાલે વિશેષતઃ ॥ ૮૩-૧૫૪॥

પઠનીયં પ્રયત્નેન ભુક્તિં મુક્તિં સમિચ્છતા ।

ઇતિ નારદપુરાણે ઉત્તરભાગે ત્ર્યશીતિતમાધ્યાયાન્તર્ગતં
નારદાય સનતકુમારપ્રોક્તં સાવિત્રીપઞ્જરસ્તોત્રં સમાપ્તમ્ ।
બૃહન્નારદીય, પૂર્વ, ૮૩/૧૫૫॥

બૃહન્નારદીયપુરાણ । પૂર્વભાગ । અધ્યાય ૮૩/૧૨૮-૧૫૪॥

bRRihannAradIyapurANa . pUrvabhAga . adhyAya 83/128-154..

Proofread by PSA Easwaran

*Naradaya Sanatakumaraproktam Savitripanjara Stotram 2*

pdf was typeset on November 16, 2024

Please send corrections to *sanskrit@cheerful.com*